श्री उ. वे. मीमांसा शिरोमणि भरतन् स्वामि (श्रीरंगम्) द्वारा अनुगृहीत

**तिरुपावै** दिव्य-प्रबंध

का **संस्कृत छन्दानुवाद**:

1.

मार्गशीर्षो ह मासोऽयं पौर्णमासी शुभं दिनम्।
आयात स्नातुमिच्छन्त्यो! हे विलक्षणभूषणाः !।।
ऋद्धिमद्गोकुलावासाः ! श्रीमत्यो! गोपबालिकाः!।
तीक्ष्णशक्त्योग्रकर्माणि कर्तुर्नन्दस्य बालकः ।।
सौन्दर्यपूर्णनयनयशोदासिंहपोतकः ।
मेघश्यामः सुरक्ताक्षः सूर्येन्दुसदृशाननः ।।
नारायणो हि भेरीं नः संश्रिताभ्यः प्रदास्यति ।
अवगाह्य ततः स्नाम श्लाघेरन् येन भूभवाः ।। १ ।।

2.

सार्थकं भुवि जीवन्त्यः ! कृष्णसंश्लेषहेतुना।
अस्मद्व्रतार्थमस्माभिः कर्तव्याः शृणुत क्रियाः ।।
क्षीराब्धौ सावधानं यः शयानः परमः पुमान् ।
पादाब्जे तस्य गायेम न पिबेम पयोघृते ।।
प्रत्यूषे स्नाम नो पुष्पं कज्जलं वा धरेमहि।
अकृतं प्राक्तनैर्नैव कुर्याम न च पैशुनम् ।
ददाम वटुभिक्षुभ्याम् आतृप्तेरुचिताय च ।
उज्जीवनविधामेवं विचिन्त्य स्याम निर्वृताः ।। २ ।।

3.

लोकान् संवर्ध्य विक्रान्तुरुत्तमस्याभिधां वराम्।
गीत्वा कुर्याम चेत्स्नानम् अस्मद्व्रतमिषाद्वयम् ।।
देशे सर्वत्र निर्बाधं मासे त्रिर्वर्षणं भवेत्।
प्रवृद्धव्रीहिसस्येषु विहरेयुर्झषाः सुखम् ।।
पुष्प्यत्कुवलसूनेषु शयीरन् रम्यषट्पदाः ।
गोष्ठं प्रविश्य निःशङ्कं पीनोधःकर्षणे गवाम् ।।
महत्यो दानशौण्डास्ताः पूरयेयुर्घटान् बहून् ।
अक्षयाः परिपूर्णाश्च भवेयुस्तेन संपदः ।। ३ ।।

4.

गम्भीर ! वृष्टिनिर्वोढस्त्वमौदार्यं मनागपि ।
मा स्म गूहः, समुद्रान्तः प्रविश्यादाय जीवनम् ।।
गर्जञ्छनैः समुत्थाय जगत्कारणवद् भजन्।
कालिमानं निजे गात्रे रम्योरुभुजशालिनः ।।
पद्मनाभस्य हस्तस्थं चक्रं व द्युतितं भजन् ।
दक्षिणावर्तशङ्खं चाप्यनुकुर्वन् रवे स्थिरम् ।।
शार्ङ्गेरितेषुवृष्ट्या त्वं तुल्यं वर्षाविलम्बितम् ।
लोकोज्जीवाय नो हृष्टया मार्गशीर्षाप्लवाय च ।।४।।

5.

आश्चर्यचेष्टितं शश्वत्प्रसिद्धमधुरापतिम् ।
प्रभूतस्वच्छपानीय-यमुनातटखेलिनम् ।।
गोपवंशे समुद्भूतं सख्यो! मङ्गलदीपवत् ।
जननीगर्भविद्योतं दामोदरमभिस्तुत ।।
विशुद्धा एनमर्चित्वा प्रसूनैः शुचिभिर्वयम् ।

वाचाऽस्य नाम संकीर्त्य मनसा चिन्तयेमहि ।।
बुद्धिपूर्वं कृतं पापम् अपि भावि प्रमादजम् ।
कृते त्वेवं प्रदूयेत तूलवज्जातवेदसि ।।५।।

6.
कूजन्ति पक्षिणो मुग्धे ! स्वामिनो विहगेशितु: ।
मन्दिराह्वानशङ्खस्य श्वेतस्य तुमुलध्वनिम् ।।
 किं नाश्रौषीः समुत्तिष्ठ पूतनाया विषस्तनम् ।
पातारं पदघातेन भञ्जकं कृत्रिमानस:।।
क्षीराब्धौ नागपर्यङ्के शयानं सर्वकारणम् ।
अवस्थाप्य हृदम्भोजे योगिनो मुनयस्तथा।।
शनैरुत्थाय तन्वन्ति हरिनाम्नो महाध्वनिम् ।
सोऽन्तः प्रविश्य नश्चित्तं विदधात्यतिशीतलम् ।।६।।

7.
कीचुकीच्विति सर्वत्र भारद्वाजाख्यपक्षिभिः।
किं संश्लिष्य कृतं रावं  नाश्रौषीर्मतिवर्जिते ! ।।
सुगन्धिकुन्तला गोप्यः कोमला दधिमन्थने ।
प्रवृत्तास्तद्रवं तासां भूषाणां शिञ्जया समम् ।।
मिलितं नायिकेऽस्माकम् अश्रौषीद् भवती न किम्।
नारायणं हि सौशील्यविग्रहं केशवं वयम् ।।
कीर्तयामस्तथाऽपि त्वं शृण्वती शयिताऽस्यहो ।
महातेजस्विनि ! क्षिप्रम् उद्घाटय कवाटिकाम् ।।७।।

8.

प्राची दिक् पाण्डुरा जाता महिष्यः प्रसृता अये।

तुषारासिक्तघासानां चरणाय च सर्वतः ॥

त्वदन्याः प्रस्थिता बाला गमनैकप्रयोजनाः ।

ततस्ता विनिवर्त्य त्वाम् आह्वातुं वयमागताः॥

वनितोत्तम ! उत्तिष्ठ कृष्णवाल्लभ्यशालिनि ! ।

भञ्जकं केशिवक्त्रस्य मल्लघ्नं देवदैवतम् ॥

गायन्त्य उपगम्याथो भेरीं लब्धुं नमेम चेत्।

हा हन्तेत्येष आलोच्य दयाम्भोधिः प्रसत्स्यति ॥८॥

9.

रत्नैः स्वच्छैः कृते हर्म्ये दीपे ज्वलति सर्वतः ।

प्रसृते धूपगन्धे च शयाने! मृदुतल्पके ॥

मातुलस्य सुते ! शीघ्रं कवाटं मणिनिर्मितम् ।

निरर्गलीकुरुष्व त्वं  तामुत्थापय मातुलि ! ॥

दुहिता तव मूका किम् एडा वा तन्द्रिता किमु ।

मन्त्रैर्वा दीर्घनिद्रायां बद्धा किं वा निरोधिता ॥

महामायेति वैकुण्ठेत्यम्बुजारमणेति च ।

एवं बहूनि नामानि संकीर्त्यैनां प्रबोधय ॥९॥

10.

अनुष्ठाय व्रतं स्वर्गं विशन्त्यस्मत्सुरक्षिके ! ।

नोद्घाटयन्ति ये द्वारं ते ददत्युत्तरं न किम् ॥

सुगन्धितुलसीमूर्धाऽस्माभिर्नारायणस्तु यः ।

ईडितो दास्यते भेरीं पुण्यरूपेण तेन हि ॥

यमास्यं कुम्भकर्णो यः कदाचित्प्रापितः पुरा ।

निर्जितः सोऽपि तुभ्यं नु दीर्घनिद्रामदात् किमु ॥
महातन्द्रायुते ! हेऽम्ब ! गोपीजनशिरोमणे! ।
विवेकसहिताऽऽगत्य कवाटोद्घाटनं कुरु ॥१०॥

11.
गणानां बालधेनूनां सुबहूनां दुहां, यथा ।
शत्रूणां बलनाशः स्यात् तथा युद्धं वितन्वताम् ॥
निर्दोषगन्धगोपानां सौवर्णलतिके सखि ! ।
वल्मीकस्थितसर्पस्य भोगोपमनितम्बिनि ! ॥
श्रीमति त्वं समायाहि वन्यबर्हिर्णसन्निभे ! ।
सर्वाः सख्यः समागत्य प्रविश्य त्वद्गृहाङ्गणम् ॥
मेघश्यामस्य नामानि कीर्तयन्त्ययि ! सम्प्रति ।
कुतस्तथाऽपि निद्रासि वाचं च चलनं विना ॥ ११ ॥

12.
महिष्यः कलिताक्रोशा दयमानाः स्ववत्सकान् ।
स्मृत्वा भावप्रकर्षेण क्षरन्त्यः पय ऊधसा ॥
पङ्किलं यस्य कुर्वन्ति गेहं तत्सच्छ्रियोऽनुजे ! ।
मस्तके वृष्टिपाते, तेऽवलम्ब्य द्वारदण्डिकाम् ॥
क्रोधाल्लङ्काधिनाथस्य निहन्तारं मनोरमम् ।
गायन्तीष्वपि हाऽस्मासु नोद्घाटयसि ते मुखम् ॥
उत्तिष्ठेतः परं वा भोः ! केयं निद्रा महत्यहो ।
जनै : सर्वैरिदं ज्ञातम् अतः शीघ्रं प्रजागृहि ॥ १२ ॥

13.

बकासुरमुखच्छेत्तुर्दुष्टचेष्टस्य रक्षसः ।

अनायासेन संहर्तुः कीर्तयन्त्यः पराक्रमम् ॥

व्रतभूमिं गता बालाः सर्वा हरिणलोचने ! ।

दृश्यतेऽप्युदितः शुक्रो गुरुस्तं गतस्तथा ॥

कूजन्ति पक्षिणः सर्वे परितः पङ्कजेक्षणे! ।

अस्माभिः सह संगम्य जले शीतेऽवगाह्य च ॥

नारीमणे ! त्वमस्नान्ती सुदिनेऽपि स्वपिष्यहो ।

रह: कृष्णेन भोगोऽत्र हेतुश्चेत्तमपि त्यज ॥ १३ ॥

14.

युष्माकं निष्कुटोद्याने विद्यमानासु वापिषु ।

विकासं याति कल्हारं याति संकोचमुत्पलम् ॥

काषायवस्त्रधर्तारः शुभ्रदन्तास्तपस्विनः ।

शङ्खध्मानाय गच्छन्ति स्वीयं देवालयं प्रति ॥

प्राग्वः प्रबोधयिष्यामीत्याश्रुत्यापि स्वपिष्यहो ।

लज्जाविरहिते! हन्त वचोवैदग्ध्यशालिनि ! ॥

शङ्खं चक्रं च दधतं सुपृथ्वोः पाणिपद्मयो : ।

पुण्डरीकेक्षणं गातुम् अये वासु ! प्रजागृहि ॥ १४ ॥

15.

शुकशाबोपमेये! भोः किन्निद्रास्यधुनाऽप्यहो ।

मा स्माह्वयत दुःश्राव्यम् आयाम्याभीरबालिकाः !॥

चिरादेवोक्तिकाठिन्यं समर्थे! विद्म भोस्तव ।

समर्थास्तत्र यूयं हि भवान्येषैव वा तथा ॥

सत्वरं त्वं समायाहि पृथक्कृत्येन किं तव ।

किमु सर्वाः समायाता ? आमेत्य गणय स्वयम् ॥
मत्तं कुवलयापीडं हन्तारमतिदक्षिणम्।
शत्रूणां बलविध्वंसे मायिनं कीर्तयेमहि ॥ १५ ॥

16.
नाथस्य नन्दगोपस्य हर्म्यस्यारक्षक! प्रभो!
ध्वजैर्विराजमानस्य तोरणस्य च पालक!॥
निरर्गलीकुरुष्व त्वं कवाटं मणिनिर्मितम् ।
ह्य एव गोपबालाभ्यो भेरीवाद्यं महास्वनम् ॥
प्रदास्यामीति रत्नाभः कृष्णो मायिक आशृणोत् ।
तस्योद्बोधकृते गातुं वयं शुद्धाः समागताः ॥
अस्मान् प्रथमतः स्वामिन् ! त्वन्मुखान्न निषेध भोः ।
द्वारस्थां सुदृढं बद्धाम् उद्घाटय कवाटिकाम् ॥ १६ ॥

17.
अम्बरं नीरमन्नं च दातर्नो नाथ ! धार्मिक ! ।
नन्दगोप! त्वमुत्तिष्ठ, नायिके! ललनोत्तमे ! ॥
उद्बुद्ध्यस्व यशोदेऽम्ब ! गोपवंशप्रदीपिके ! ।
देवेशोत्तिष्ठ खं भित्वा वर्धित्वा क्रान्तवन् ! जगत् ॥
काञ्चनं नूपुरं धर्तः ! श्रीयुत ! त्वं सहानुजः ।
उत्तिष्ठ बलदेव ! त्वं मैव स्वपिहि सम्प्रति ॥ १७ ॥

18.
स्रवन्मदेभतुल्यो यः सङ्ग्रामे नो पलायते ।
महाभुजबलो नन्दो गोपस्तस्य स्नुषे! वरे! ॥
सुगन्धिचिकुरे ! नीले ! द्वारमुद्घाटयाधुना ॥

सर्वतः कुक्कुटा रुत्वोद्बोधयन्त्ययि ! मानुषान् ॥
सङ्घशो माधवीकुञ्जे कूजन्ति बहुशः पिका : ।
कन्दुकाञ्चितहस्ते ! भो नामानि कमितुस्तव ॥
वयं गातुं समायाता वलयानां क्वणेन हि।
आगत्य पाणिपद्माभ्यां हृषितोद्घाटनं कुरु ॥ १८ ॥

19.
दीपे ज्वलति चोत्तुङ्गे दन्तिदन्तेन निर्मितैः ।
पादैः संयुतखट्वास्थम् आरुह्य मृदुतल्पकम् ॥
विकसत्पुष्पकेशिन्या नीलायाः स्तनयोरयि ! ।
विनिवेश्य विशालोरः शयानोद्घाटयेर्मुखम् ॥
अञ्जनाञ्चितपृथ्वक्षि! नीले ! वल्लभस्य ते।
अप्यल्पकालमुत्थानं शयनान्नानुमन्यसे ॥
क्षणमात्रं न विश्लेषं सोढुं शकनवत्यहो ।
एतत्पुरुषकारस्य ते स्वभावस्य नोचितम् ॥ १९ ॥

20.
त्रयस्त्रिंशदमर्त्यानां पुरो गत्वाऽथ कम्पनम् ।
तेषां नाशितवन् ! वीर ! जागृयाः ऋजुताश्रय ! ॥
सामर्थ्ययुक्त! हे द्वेष्टुर्भयदायक ! निर्मल ! ।
कुम्भवन्मृदुवक्षोजे ! बिम्बोष्ठे ! तनुमध्यमे ! ॥
नीले ! श्रीर्वाम ! उत्तिष्ठ दर्पणं व्यजनं च नः ।
वितीर्य तव पत्या त्वम् अस्मान् स्नापय सम्प्रति ॥ २० ॥

21.
दोहनार्थं गृहीतेभ्यः पात्रेभ्यः पयसो यथा ।

उत्पीडः स्यात्तथाऽजस्रं सवित्रीणां पयःस्रुतेः ॥
उदारोत्तुङ्गधेनूनां बहूनां स्वामिनः सुत ! ।
प्रबुध्यस्व महात्मन् ! भोः श्रितरक्षणदीक्षित ! ॥
जगत्यस्मिन् समुद्भूततेजोराशे ! प्रजागृहि ।
शत्रवो नष्टवीर्यास्ते संप्राप्य भवनाङ्गणम् ॥
अगत्या तव पादाब्जे आश्रयन्ते यथा तथा ।
मङ्गलं कीर्तयन्त्यस्त्वां स्तुवत्यो वयमागताः ॥ २१ ॥

22.
रम्याणां भूमिभागानां विशालानामधीश्वराः ।
भग्नमानाः समागत्य पर्यङ्काधः स्थले हि ते ॥
सङ्घीभवन्ति हा तद्वद् वयं प्राप्तास्तवान्तिकम्।
किङ्किणीमुखवत्फुल्ले राजीव इव लोहिते ॥
लोचने तावके किं नो मन्दं मन्दं न पश्यतः ।
उत्थितौ यौगपद्येन हिमोष्णकिरणाविव ॥
सौम्ये ते ये दृशौ ताभ्यामस्मान् यदि कटाक्षयेः ।
अवश्यं नोऽनुभोक्तव्यम् अपि पापं विनश्यति ॥ २२॥
23.
सम्यक्सुप्तो महासिंहो वर्षासु गिरिकन्दरे ।
प्रबुध्योन्मील्य नेत्रे स्वे कणानग्नेः किरन्निव ॥
सुरभीणां सटानां च स्याद्विकासो यथा तथा ।
चलित्वा सर्वपार्श्वेषु विधूयावयवान् समान् ॥
विसृज्य महतीं तन्द्रां गर्जन्निःसृत्य गह्वरात् ।
यथाऽऽगच्छति तद्वत्त्वम् अतसीपुष्पवर्ण! भोः ॥
त्वन्मन्दिरादिहागत्य दिव्यसिंहासने स्थितः ।
अथागमनकार्यं नः कारुण्येन विचारय ॥२३॥

24.

पूर्वमेतज्जगत्क्रान्त! पादाभ्यां तव मङ्गलम् ।
गत्वा रुचिरलङ्कां तां हन्तः ! शौर्याय मङ्गलम् ॥
शकटं पत्प्रहारेण भङ्क्तः ! कीर्त्यै सुमङ्गलम् ।
वत्सं दण्डवदादाय क्षेप्तः ! पद्भ्यां सुमङ्गलम् ॥
छत्रवद्गिरिमुद्धर्तः ! सद्गुणेभ्यः सुमङ्गलम् ।
शत्रून् विजित्य हन्त्र्यै ते हस्ते शक्त्यै सुमङ्गलम् ॥
इत्थं ते वीरकर्माणि स्तुत्वा लब्धुं च भेरिकाम् ।
वयमद्य समायाता अस्मासु त्वं दयस्व भोः! ॥२४॥

25.

एकस्या मातुरुद्भूय निशीथिन्यां तदैव हा।
अन्यस्या आत्मजो भूत्वा वर्धमाने रहस्त्वयि ॥।
असहिष्णुस्ततः कंसो मतिं चक्रे तवाहिते।
विफलां तां मतिं कृत्वा कुक्षौ तस्याग्निवत्स्थित !
अतिव्यामोहशालिन् ! त्वां प्रार्थयन्त्यो निजाशिषम्।
समायाता वयं बाला यदि भेरीं ददासि नः ॥
श्रियाऽभिलष्यमाणां ते सम्पदं वीरकर्म च ।
गीत्वा शोकाद्विनिर्मुच्य भविष्यामः प्रहर्षिताः ॥२५॥

26.

श्रितेषु वत्सल! स्वामिन् ! इन्द्रनीलाभकान्तिमन्!।
पूर्वैराचरितायास्मै मार्गशीर्षाप्लवाय नः ॥
अपेक्षितानि वस्तूनि कथ्यन्ते शृणुतादयि ! ।
बृहत्तमाश्च सर्वस्या जगत्याः कम्पदस्वनाः॥

पयःसमानवर्णास्वपाञ्चजन्याभकम्बवः ।
सुमहद् भेरिवाद्यं च मङ्गलस्तुतिगायकाः ॥
रम्यदीपो ध्वजोल्लोचौ सर्वमेतदपेक्षितम् ।
कृपया परया देहि वटपत्रपुटेशय ! ॥२६॥

27.
शत्रुजिद्गुण! गोविन्द ! त्वां वै संकीर्त्य, भेरिकाम् ।
लब्ध्वाऽस्माभिः सभूश्लाघं प्राप्यः सम्मान उच्यते ॥
वलयाङ्गदताटङ्ककर्णपुष्पाङ्घ्रिभूषणम् ।
बहून्याभरणान्येवं वयं सम्यग्धरेमहि ॥
क्षौमवस्त्रं वसित्वाऽथ क्षीरान्नं घृतपूरितम् ।
सङ्घीभूय मुदाऽद्याम कफोणिप्रवहद्धृतम् ॥२७॥

28.
धेनूरन्वित्य गोविन्द! काननम् प्राप्य भुञ्ज्महे ।
शेमुषीलेशहीनेऽस्मिन् गोपवंशे जनिं तव ॥
पुण्यवत्यो वयं लब्धुं न्यूनतालेशवर्जित ! ।
इह केनापि नो नाश्यः संबन्धो नस्त्वया सह ॥
ज्ञानहीना वयं बाला: प्रेम्णा त्वां लघुनामभिः ।
आह्वयामः स्म मा कुप्य स्वामिन् ! भेरीं प्रयच्छ नः ॥ २८॥

29.
प्रत्यूष उपगम्य त्वां सेवित्वा, स्वर्णभास्वती ।
पदाम्भोजे तव स्तुत्वा प्रार्थ्यमानं फलं शृणु ॥
धेनुसंचारणाजीवे वंशेऽस्मिन्नवतीर्ण! भोः ।
त्वमन्तरङ्गकैङ्कर्यम् अस्मत् स्वीकर्तुमर्हसि ॥

अद्य भेरीमिमां लब्धुम् वयं गोविन्द ! नागताः।
अवतारेऽप्यजस्रं त्वत्सम्बन्धिन्यो भवाम हि॥
शेषवृत्तीश्च कुर्याम त्वत्प्रीत्येकप्रयोजनाः ।
कृपयैतद्विरुद्धान्नः कामानन्यान् निवर्तय ॥२९॥

30.
मन्थकं भङ्गवदद्व्रार्धर्माधवं केशिनाशनम्।
दीव्यच्चन्द्रानना गोप्यो रम्याभरणभूषिताः ॥
उपेत्यानम्य भेरीं ताम् अलभन्तेति वस्तुनि ।
धराऽलङ्कारभूतश्रीनव्याख्यनगरीशितुः ॥
धृतपद्माक्षमालस्य भट्टनाथस्य कन्यया।
गोदया कीर्तितास्त्रिंशद्गाथा द्राविडभाषया ॥
सुभोग्या माल्यवत्सर्वा येऽनुसंदधते भुवि ।
महापर्वतसंकाशबाहुद्वियुगशालिनः ॥
रक्ताक्षसौम्यवक्त्रस्य श्रीपतेः परमां कृपाम् ।
इहामुत्र च लब्ध्वा ते भजेरन् निर्वृतिं पराम् ॥३०॥

*आषाढपूर्वफल्गुन्यामवतीर्णा भुवां जयेत् ।*
*व्रतप्रबन्धगाथानां त्रिंशतो गायिका जयेत् ॥*
*शुभाशासनसक्तश्रीविष्णुचित्तात्मजा जयेत् ।*
*महाभूतपूरीनाथयतिराजानुजा जयेत् ॥*
*अग्निश्रुतीन्दुसंख्याकपद्यानां गायिका जयेत् ।*
*श्रीमते रङ्गनाथाय प्रेम्णा दात्री स्रजो जयेत् ॥*
*गन्धाढ्यमल्लिदेशस्य ऋद्धस्य महिषी जयेत् ।*
*श्रीनव्यपुरगोदायाः पादाब्जयुगली जयेत् । ।*